# श्रीशिवमानसपूजा

रत्नैः कल्पित मासनं हिमजलैः स्नानं च दिव्याम्बरं
नानारत्न विभूषितं मृगमदामोदाङ्कितं चन्दनम् ।
जाती चम्पक बिल्वपत्र रचितं पुष्पं च धूपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥ १॥

सौवर्णे नवरत्न खण्ड रचिते पात्रे घृतं पायसं
भक्ष्यं पञ्चविधं पयो दधियुतं रम्भाफलं पानकम् ।
शाकाना मयुतं जलं रुचिकरं कर्पूर खण्डोज्ज्वलं
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥ २॥

छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं
वीणा भेरि मृदङ्ग काहल कला गीतं च नृत्यं तथा ।
साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥ ३॥

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोग रचना निद्रा समाधि स्थितिः ।
सञ्चारः पदयोः प्रदक्षिण विधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्त दखिलं शम्भो तवाराधनम् ॥ ४॥

करचरण कृतं वाक्कायजं कर्मजं वा ।
श्रवण नय नजं वा मानसं वापराधम् ।
विहित मविहितं वा सर्वमेतत् क्षमस्व ।
जय जय करुणाब्धे श्री महादेव शम्भो ॥ ५॥

॥ इति श्रीमच्छङ्कराचार्य विरचित शिवमानसपूजा समाप्ता ॥